## तनादिकृञ्भ्यः उः । (७९/२४६६)

'तनु [1]विस्तारे' (धा. पा. १४६४) इत्येवमादिभ्यो धातुभ्यः कृञश्च [2]उप्रत्ययो भवति[3] । शपोऽपवादः । तनोति । सनोति । क्षणोति । कृञः खल्वपि – करोति[4] । तनादिपाठादेव [5]उप्रत्यये सिद्धे[6] करोतेरुपादानं नियमार्थम्, अन्यत् तनादिकार्यं मा भूत् इति । 'तनादिभ्यस्तथासोः' (२.४.७९/२५४७) इति विभाषा सिचो लुग् [7]न भवति । [8]अकृत । अकृथाः ॥

## धिन्विकृण्व्योर च । (८०/२३३२)

'हिवि' (धा. पा. ५९१), '[9]धिवि' (धा. पा. ५९३) 'जिवि' (धा.पा. ५९४) प्रीणनार्थाः, 'कृवि [10]हिंसाकरणयोः' (धा. पा.५९८), [11]इत्येतयोः धात्वोः उप्रत्ययो भवति, अकारश्चान्तादेशः । धिनोति । कृणोति । अतो लोपस्य (६.४.४८/२३०८) स्थानिवद्भावात् (१.१.५७/५०) गुणो न भवति ॥

## क्र्यादिभ्यः श्ना । (८१/२५५४)

'डुक्रीञ् द्रव्यविनिमये' (धा. पा. १४७४) इत्येवमादिभ्यः [12]धातुभ्यः श्ना प्रत्ययो भवति[13] । शपोऽपवादः । [14]शकारः [15]सार्वधातुकसञ्ज्ञार्थः । क्रीणाति । प्रीणाति ॥

## स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च । (८२/२५५५)

आद्याश्चत्वारो धातवः सौत्राः, 'स्कुञ् आप्रवणे' (धा. पा. १४७९)[16], एतेभ्यः श्ना प्रत्ययो भवति, [17]श्नुः च । स्तभ्नाति, स्तभ्नोति । स्तुभ्नाति, स्तुभ्नोति । स्कभ्नाति, स्कभ्नोति । स्कुभ्नाति, स्कुभ्नोति । स्कुनाति, स्कुनोति । उदित्त्वप्रतिज्ञानात् सौत्राणामपि धातूनां [18]सर्वार्थत्वं विज्ञायते, नैतद्विकरणविषयत्वमेव[19] ॥

## हलः श्नः शानज्झौ । (८३/२५५७)

हल उत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति हौ परतः । मुषाण[20] । पुषाण[21] । हलः इति किम् ? [22]क्रीणीहि । हौ इति किम् ? मुष्णाति[23] । श्नः इति[24] स्थानिनिर्देशः आदेशसम्प्रत्ययार्थः । इतरथा हि प्रत्ययान्तरमेव[25] सर्वविषयं विज्ञायेत ॥

---

1. विस्तारे नास्ति फ. 2. उः प्रत्ययो अ. 3. कर्तृवाचिनि सार्वधातुके परतः इत्यधिकम् ह. 4. कुरुतः कुर्वन्ति इत्यधिकम् फ. ह. 5. प्रत्यये ह. 6. पुनः इत्यधिकम् अ. क. 7. मा भूत् इति ह. 8. नास्ति फ. ह. 9. दिवि ड. 10. हिंसायां करणे च फ. 11. धिन्वि कृण्व्योः इ. 12. धातुभ्यः नास्ति फ. 13. कर्तृवाचिनि सार्वधातुके परतः इत्यधिकम् ह. 14. वाक्यमिदं नास्ति फ. 15. सार्वधातुकार्थः क. 16. क्र्यादिः इत्यधिकम् ह. ड, क्रैयादिकः अ. फ. 17. श्नुप्रत्ययश्च ह. फ. 18. अन्यार्थत्वम् क. 19. सर्वविधिविषयत्वमपि विज्ञायते इत्यधिकम् क. 20. रत्नानि इत्यधिकम् अ. 21. बधान वत्सम् इत्यधिकम् अ. क. ड. 22. प्रीणीहि अ. क. ड. 23. पुष्णाति इत्यधिकम् अ. ड. 24. किम् इत्यधिकम् ह. 25. एव नास्ति ह.